Chapter Name:जयन्ति ते सुकृतिनः। *Marks :(4)*

Quest:

**1.1 कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।**

१. "स्वराज्यम् अस्माकं जन्माधिकारः एव " - कस्य वचनमिदम् ?

(बालगङ्गाधरतिलकस्य, महात्मागान्धिनः, डा. एस्.राधाकृष्णस्य, जवहर्लाल् नेह्रोः )

२. वेदानां कालनिर्णयं कर्तुं प्रयतितेषु अन्यतमः ?

( बालगङ्गाधरतिलकः , महात्मागान्धी , डा.एस् . राधाकृष्णः , जवहर् लाल् नेह्रु )

३. गीतारहस्यं केन विरचितम् ?

( महात्मागान्धिना , रवीन्द्रनाथठाकूरेण , डा.एस् . राधाकृष्णेन, बालगङ्गाधरतिलकेन)

४. भारतस्य प्रथमः उपराष्ट्रपतिः कः ?

(डा. एस् . राधाकृष्णः , डा. राजेन्द्रप्रसादः , महात्मागान्धी , के आर् नारायणः )

**1.2 कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।**

५. महात्मागान्धिनः आत्मकथायाः नाम ?

(गीतारहस्यम् , सत्यशोधनम् , नवभारतम् , शङ्करदिग्विजयम् )

६. " वेदान्तस्य धार्मिकता " नामकस्य ग्रन्थस्य कर्ता कः?

(महात्मागान्धिनः, डा. एस् राधाकृष्णस्य, डा. राजेन्द्रप्रसादस्य,बालगङ्गाधरतिलकस्य)

७. " रामराज्यसङ्कल्पः " कस्य आशयः भवति ?

(महात्मागान्धिनः, डा. एस् राधाकृष्णस्य, डा. राजेन्द्रप्रसादस्य,बालगङ्गाधरतिलकस्य)

८. " संस्कृतपठनात् ऋते कश्चन यथार्थः भारतीयः न भवेत् ।" कस्य वचनमिदम् ?

(महात्मागान्धिनः, डा. एस् राधाकृष्णस्य, डा. राजेन्द्रप्रसादस्य,बालगङ्गाधरतिलकस्य)

**1.3 कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।**

९. " अहिंसासिद्धान्तः " स्वजीविते स्वीकृतवान् कः ?

(डा. एस् .राधाकृष्णः , बालगङ्गाधरतिलकः, महात्मागान्धिः, डा. एस्. राजेन्द्रप्रसादः )

१०. " ऋते " इत्यस्य योगे का विभक्तिः ?

(तृतीया , पञ्चमी , चतुर्थी , द्वतीया )

११. " कर्मण्येवाधिकारस्ते मा फलेषु कदाचन " इति वचनं कस्माद् ग्रन्थाद् उद्धृतम् ?

( भगवद्गीतायाः, रामायणात् , पञ्चतन्त्रात् , हितोपदेशात् )

१२. भगवद्गीता कस्माद् ग्रन्थाद् उद्धृतम् ?

( महाभारतात् , रामायणात् , पञ्चतन्त्रात् , हितोपदेशात् )

**Hint:**

1.1.१. बालगङ्गाधरतिलकस्य

२. बालगङ्गाधरतिलकः

३. बालगङ्गाधरतिलकेन

४. डा. एस् . राधाकृष्णः

1.2 ५. सत्यशोधनम्

६. डा. एस् राधाकृष्णस्य

७. महात्मागान्धिनः

८. महात्मागान्धिनः

1.3 ९. महात्मागान्धिः

१०. पञ्चमी

११. भगवद्गीतायाः

१२. महाभारतात्

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**यथोचितं योजयत।**

2.1 बालगङ्गाधरतिलकः - अहिंसा सिद्धान्तः।

महात्मागान्धी - वेदान्तस्य धार्मिकता ।

डा. एस्. राधाकृष्णः - दार्शनिकग्रन्थः।

भगवद्गीता - वेदकालनिर्णयः ।

2.2 महात्मागान्धी - गीतारहस्यम् ।

डा. एस् . राधाकृष्णः - आत्मकथा ।

बालगङ्गाधरतिलकः - अध्यापकदिनम् ।

सत्यशोधनम् - ओक्टोबर् २ ।

2.3 बालगङ्गाधरतिलकः - ओक्टोबर् २ ।

महात्मागान्धी - राष्ट्रपतिः ।

डा. एस् . राधाकृष्णः - राष्ट्रपिता ।

गान्धिजयन्ती - स्वातन्त्र्यसंग्रामनायकः ।

2.4 " स्वराज्यम् अस्माकं जन्माधिकारः एव ।"

- लाल् बहादूर् शास्त्रिः

" जय् जवान् जय् किसान् । ”

- श्रीबुद्धः

" आशा दुःखस्य कारणम् ।"

- श्री नारायणगुरु

" एका जातिः , एको धर्मः , एको देवः मनुष्याणाम् ।"

- बालगङ्गाधरतिलकः,:

2.5 " वन्दे मातरम् ।" - सुभाष् चन्द्रबोस्

"जय् हिन्द् ।" - दूरदर्शनम्

सत्यं शिवं सुन्दरम् - भारतसर्वकारः

सत्यमेव जयते - . बङ्किंचन्द्रचाट्टर्जी ..... ।

Hint:

2.1 वेदकालनिर्णयः।

अहिंसा सिद्धान्तः।

वेदान्तस्य धार्मिकता ।

दार्शीनिकग्रन्थः।

2.2 ओक्टोबर् २ ।

अध्यापकदिनम्।

गीतारहस्यम् ।

आत्मकथा ।

2.3 स्वातन्त्र्यसंग्रामनायक:।

राष्ट्रपिता ।

राष्ट्रपतिः।

ओक्टोबर् २।

2.4 बालगङ्गाधरतिलकः।

लाल् बहादूर् शास्त्रि:।

श्रीबुद्धः।

श्री नारायणगुरुः।

2.5 बङ्किंचन्द्रचाट्टर्जी

सुभाष् चन्द्रबोस्

दूरदर्शनम्

भारतसर्वकारः

Chapter Name:जयन्ति ते सुकृतिनः। *Marks :(1)*

Quest:

**उदाहरणानुसारं विश्लेषयत ।**

1 **उदा: - तथाऽपि - तथा + अपि ।**

रमाऽपि - ......+ ...........।

मालाऽपि - ......+ .........।

बालिकाऽपि - ......+ .......।

धाराऽपि - ......+ ...........।

2 **उदा: -पराजितोऽपि - ......+ .......। पराजित:+अपि।**

बालोऽपि - ......+ .......।

गजोऽपि - ......+ ........।

पुत्रोऽपि - ......+ .........।

तातोऽपि - ......+ .......।

3 **उदा: - झटित्येव - झटिति + एव ।**

यद्येव - ......+ .......।

करोत्येव - ......+ .......।

चलत्येव - ......+ .......।

महत्येव - ......+ .......।

फलान्येव - ......+ .......।

**4 उदा: - बाल्य एव - बाल्ये + एव ।**

पुत्र एव ......+ ........... ।

प्रभात एव ......+ ....... ।

कार्य एव ......+ ......... ।

**5 उदा :- आसीदयम् - आसीत् + अयम्**

तस्मादयम् - ......+ ....... ।

तदारभ्य - ......+ .......... ।

पश्चादयम् - ......+ ........ ।

तदधिकम् - ......+ ........ ।

Hint:

1 रमा+अपि।

माला+अपि।

बालिका+अपि।

धारा+अपि।

2 बाल:+अपि।

गज:+अपि।

पुत्र:+अपि।

तात:+अपि।

3 यदि + एव।

करोति+ एव ।

चलति+ एव।

महति+ एव ।

फलानि+ एव ।

4 पुत्रे + एव।

प्रभाते + एव।

कार्ये + एव।

**5 उदा :- आसीदयम् - आसीत् + अयम्**

तस्मादयम् - ......+ .......। तस्मात्+ अयम्।

तदारभ्य - ......+ .......। तत्+ आरभ्य।

पश्चादयम् - ......+ .......। पश्चात्+अयम्।

तदधिकम् - ......+ .......। तत्+अधिकम् ।

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**उदाहरणानुसारं एकं पदं लिखत ।**

**1 उदाः - पुरुषेषु उत्तमः - पुरुषोत्तमः। उत्तराणि**

सर्वेषु उत्तमः - ..........।

कुलेषु उत्तमः - .........।

नरेषु उत्तमः - ...........।

नृपेषु उत्तमः - ...........।

गजेषु उत्तमः - ...........।

**2 उदाः - राष्ट्रस्य पिता - राष्ट्रपिता ।**

राष्ट्रस्य पतिः - ...........।

कुलस्य पतिः - ...........।

साम्राज्यस्य अधिपतिः - ...........।

**3 उदाः - स्वस्य राज्यम् - स्वराज्यम् ।**

स्वस्य पत्रिका - ...........।

स्वस्य इदम् - ...........।

स्वस्य राष्ट्रम् - ...........।

स्वस्य साम्रज्यम्- ...........।

**Hint:**

**पुरुषेषु उत्तमः - पुरुषोत्तमः।**

सर्वोत्तमः।

कुलोत्तमः।

नरोत्तमः। नृपोत्तमः।

गजोत्तमः।

2

राष्ट्रपतिः।

कुलपतिः।

साम्राज्याधिपतिः।

3

स्वपत्रिका।

स्वकीयम्।

स्वराष्ट्रम्।

स्वसाम्रज्यम्।

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**उदाहरणानुसारं वाक्यं परिवर्तयत ।**

1 **उदा - भोजनाय पायसं नास्ति । अन्यत् सर्वम् अस्ति ।**

**भोजनाय पायसात् ऋते अन्यत् सर्वम् अस्ति ।**

(१) महानसे लवणं नास्ति । अन्यत् सर्वम् अस्ति ।

----------------------------।

(२) जलाशये कमलं नास्ति । अन्यत् सर्वम् अस्ति ।

---------------------------- ।

(३) ग्रन्थशालायां पञ्चतन्त्रं नास्ति। अन्यत् सर्वम् अस्ति ।

---------------------------- ।

(४) उद्याने पाटलं नास्ति। अन्यत् सर्वम् अस्ति

---------------------------- ।

**2 उदा - कालिदास: नाटककर्ता आसीत् | स: महाकवि: च आसीत् |**

**कालिदास: न केवलं नाटककर्ता किन्तु महाकवि: च आसीत् |**

(१) मासिक्यां कविता: सन्ति | तत्र कथादयश्च सन्ति |

---------------------------- ।

(२) भेक: स्थले वसति | स: जले च वसति |

---------------------------- ।

(३) कानने मृगा: सन्ति | तत्र पक्षिण: च सन्ति |

---------------------------- ।

(४) आकाशे ग्रहा: सन्ति | तत्र नक्षत्राणि च सन्ति |

---------------------------- ।

**Hint:**

5.1 (१) महानसे लवणात् ऋते अन्यत् सर्वम् अस्ति ।

(२) जलाशये कमलात् ऋते अन्यत् सर्वम् अस्ति ।

(३) ग्रन्थशालायां पञ्चतन्त्रात् ऋते अन्यत् सर्वम् अस्ति।

(४) उद्याने पाटलात् ऋते अन्यत् सर्वम् अस्ति।

5.2 (१) मासिक्यां न केवलं कविता: किन्तु कथादयश्च सन्ति |

(२) भेक: न केवलं स्थले किन्तु जले च वसति |

(३) कानने न केवलं मृगा: किन्तु पक्षिण: च सन्ति |

(४) आकाशे न केवलं ग्रहा: किन्तु नक्षत्राणि च सन्ति |

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**सूचनानुसारं जीवनचरितम् लिखत ।**

1 नाम - स्वातितिरुनाल् रामवर्मा।

जन्म - 1813 एप्रिल् 13 ।

पितरौ - राजराजवर्मा वलियकोयितम्पुरान् , राणि लक्ष्मीभाई च ।

कर्ममण्डलम् - प्रजापालनम् संगीतम् च ।

प्रशस्तिः - गर्भश्रीमान् ।

कृतयः - रागमालिकास्वरजतिः , नवरात्रि कीर्त्तनानि च।

देहवियोगः - 1846 डिसम्बर् 27.

2 नाम - बालगङ्गाधरतिलक:।

जन्म - 1856 जुलै 23, महाराष्ट्रा ।

पितरौ - गङ्गाधररामचन्द्रतिलक:, पार्वती बाई ।

कर्ममण्डलम् - सामाजिकपरिष्कर्ता, स्वातन्त्र्यसंग्रामनायक:।

देहवियोगः - 1920 आगस्त् 1, मुम्बई ।

3 नाम - श्री नारायणगुरुः ।

जननम् - तिरुवनन्तपुरे चेम्पषन्ति ग्रामे ।

पितरौ - माटनाशान् , कुट्टियम्मा ।

प्रवर्त्तनमण्डलम् - सामाजिकपरिष्कर्ता , सन्यासिवर्यः , समाजोद्धारकः ।

कृतयः - दर्शनमाला , आत्मोपदेशशतकम् , दैवदशकम् इत्यादिः।

देहवियोगः - 1928 सेप्तंबर 21 ।

4 नाम - डा. ए पी जे अब्दुल् कलाम् ।

जन्म - 1931 ओक्टोबर् 15 ।

पितरौ - जैनलुब्दीन् आषियम्मा च ।

जन्मस्थानम् - तमिलनाट् राज्ये रामेश्वरम् ।

कर्ममण्डलम् - वैज्ञानिकः , प्रभाषकः , अद्ध्यापकः च।

प्रशस्तिः - भारतस्य राष्ट्रपतिः।

कृतयः - "विङ्स् ओफ् फ़यर् , टेणिङ् पोइण्ट्स् इत्यादिः।

पुरस्काराः - भारतरत्नम् , पद्मभूषण् , पद्मविभूषण् इत्यादयः ।

देहवियोगः - 2015 जुलै 27 ।

**Hint:**

* आशयग्रहणाय -१

* उचितलेखनाय -२

* भाषाशैली -१

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**खण्डिकां पठित्वा जीवचरित्ररूपरेखां (Profile) लिखत।**

**क)**

आधुनिकभारतस्य शिल्पिः जवहर् लाल् नेह्रु महाशयः 1889 वर्षे नवम्बर् मासे 14 तमे दिने जनिमलभत । तस्य पितुः नाम मोत्तिलाल् नेह्रु, मातुः नाम स्वरूपाराणी इति चासीत्। स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिपदं स्वीकृत्य 1947-1964 वर्ष कालपर्यन्तम् राज्यशा सनम् कृतवान् । प्रशस्तात् केम्ब्रिड्ज विश्वविद्यालयात् स्नातकपरीक्षाम् उत्तीर्णवान् । 1916 तमे वर्षे ब्राह्मणकुलजातां कमलां परिणीतवान् ।"डिस्कवरि ओफ़्इन्ड्या","आन् ओट्टोबयो ग्रफ़ि" इत्यादय: तस्य प्रसिद्धा: कृतय: आसीत्।

नेहरू महाभाग: 1964 तमे वर्षे मेई मासस्य 27 तमे दिने यश:शरीरोऽभवत् ।

नाम - ............................... ।

जननम् - ............................... ।

पितरौ - ............................... ।

प्रशस्तिः - ............................... ।

कृतयः - ............................... ।

देहवियोगः - ............................... ।

ख)

कैरलीसाहित्ये स्ववैयक्तिकमुद्रां निहितो लेखको भवति वैक्कं मुहम्मद् बषीर्

महाशयः । अयं वैक्कं ग्रामसमीपे तलयोलपरम्ब् नामके स्थले 1908 तमे वर्षे जानुवरी मासे 19 तमे दिने जनिमलभत । आत्मकथांशत्वम् , मतनिरपेक्षत्वम् , नर्मत्वम् , मनुष्यस्नेहत्वम् इत्यादि गुणैः तस्य कृतयः पूर्णोऽभवत् । अयं महात्मा "बेप्पूर् सुल्त्तान् " इति प्रशस्तोऽभवत् । विविध शाखासु त्रिंशत् पुस्तकानि सः लिखितवान्। तेषु 'बाल्यकालसखी', 'पात्तुम्मयुटे आट् ','शब्दङ्ङल्' इत्यादयः प्रधानकृतयः आसीत्। केन्द्रसाहित्यअक्कदमीपुरस्कारः,केरलसाहित्यअक्कादमीपुरस्कारः, वल्लत्तोल्पुर स्कारः , पद्मश्रीः इत्यादीन् बहून् पुरस्कारान् अलभत । 1994 तमे वर्षे जुलै मासे पञ्चमे दिने बषीर् महाशयः दिवमगात्।

नाम - ................................ ।

जननम् - ................................ ।

कृतयः - ................................ ।

प्रशस्तिः - ................................ ।

पुरस्काराः - ................................ ।

देहवियोगः - ................................ ।

ग)

कैरलीसाहित्यस्य विश्वव्यापने आकर्षणे च बद्धश्रद्धः आसीत् तकषि शिवशङ्करपिल्लै महाशयः ।सः 1912 तमे वर्षे एप्रिल् मासस्य 17 तमे दिने आलपुषजिल्लायां तकषीप्रदेशे जनिमलभत । सामान्यजनानां वैकारिकान् अनुभवान्, जीवितरीतिम्, सामूहिकयाथार्थ्यं च स्वस्य कृतिषु चित्रीकृत्य तकषिमहाशयः कैरलीसाहित्यं यथार्थ दिशम् आनीतवान् । सः न केवलं कथाकारः अपि तु साहित्यकारश्च आसीत् । ' तोट्टियुटे मकन्' , 'रण्डिटङ्ङषि', 'चेम्मीन्', 'कयर्' इत्यादयः तस्य प्रशस्तः कृतयः । महाशयोऽयं ज्ञानपीठपुरस्कारः , पद्मभूषण्,वयलार् पुरस्कारः , केन्द्र-केरलसाहित्य अक्कादमी पुरस्कारः, वल्लत्तोल् पुरस्कारः इत्यादि पुरस्कारैः समादृतः । कैरलीसाहित्यं धन्यं कृतवानयं साहित्यकारः 1999 तमे वर्षे एप्रिल् मासस्य दशमे दिने दिवंगतः ।

नाम - ................................ ।

जननम् - ................................ ।

कृतयः - ................................ ।

प्रशस्तिः - ................................ ।

पुरस्काराः - ................................ ।

देहवियोगः - ................................ ।

**Hint:**

* आशयग्रहणाय -१

* उचितलेखनाय -२

* भाषाशैली -१

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**|| संस्कृति : ||**

**| वार्तादिनपत्रिका |**

**2018 ओक्टोबर् 3, बुधवासरः**

तिरुवनन्तपुरम् - गान्धिजयन्तीदिनमनुबन्ध्य स्वातन्त्र्यसंग्रामसेना नायकं श्री के



केलप्पन् महाशयमधिकृत्य अनुस्मरणप्रभाषणं गतदिने तिरुवनन्तपुरं सर्वकारीय उच्चविद्यालये आयोजयत्। अनुस्मरण प्रभाषणस्य उद्घाटनकर्मबहुमान्यः विद्याभ्यासमन्त्री निरवहत् । केलप्पन् महाशयमधिकृत्य विद्याभ्यास मन्त्रिणः अनुस्मरणप्रभाषणात् - " केरलगान्धी इति प्रथितः महानुभावः भवति के केलप्पन् महोदयः। तस्य पूर्णनाम कोयप्पल्लि

केलप्पन् नायर् इति आसीत् । 1889 तमे वर्षे ओगस्ट् मासस्य 24 दिनाङ्के कोषिक्कोट् जिल्लायां जनिमलभत । प्रमुखः स्वातन्त्र्यसंग्रामप्रवर्तकः अयं गान्धिमार्गानुयायी, चिन्तकश्चासीत्। "नायर् सर्वीस् सोसैट्टि" संस्थायाः स्थापकेष्वन्यतमः प्रथमाध्यक्षः चासीत् अयं महानुभावः । प्रसिद्धस्य 'गुरुवायुर् सत्याग्रह समरस्य' नायकः आसीत् के केलप्पः । 1971 तमे ओक्टोबर् मासस्य सप्तमे दिने अयं महानुभावः दिवमगात्।

नाम - ............................... ।

जननम् - ............................... ।

प्रशस्तिः - ............................... ।

कर्मक्षेत्रम् - ...............................।

पुरस्काराः - ............................... ।

देहवियोगः - ............................... ।

**Hint:**

* आशयग्रहणाय -१

* उचितलेखनाय -२

* भाषाशैली -१

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(4)*

**Quest:**

**रेखाङ्कितपदानि उत्तररूपेण लब्धुं कोष्ठकात् उचितं पदं स्वीकृत्य प्रश्ननिर्माणं कुरुत।**

मौर्यवंशप्रथमराजस्य चन्द्रगुप्तस्य मन्त्री आसीत् चाणक्यः । चाणक्यस्य पिता चणकः कश्चन ब्राह्मणः आसीत् । सः यौवने तक्षशिलायाम् अवसत् । चाणक्यः अर्थशास्त्रम् इति पुस्तकस्य लेखको भवति। राजनीत्यां तस्य नीतिः चाणक्यनीतिः इति नाम्ना प्रसिद्धास्ति ।

( केन , कस्य , कः , कुत्र )

**Hint:**

1 ) मौर्यवंशप्रथमराजस्य प्रथमः राजा कः ?

2) चाणक्यस्य पिता कः भवति ?

3) चाणक्यः यौवने कुत्र अवसत् ?

4) चाणक्येन विरचितः ग्रन्थः कः ?

5) राजनीत्यां चाणक्यस्य नीतिः कस्मिन् नामनि प्रसिद्धास्ति ?

उचित प्रश्नवाचकपदलेखनाय - 1 अङ्कः।

**Chapter Name:जयन्ति ते सुकृतिनः।** *Marks :(1)*

**Quest:**भगवद्गीतायाः प्रेरणां प्राप्य बालगंगाधरतिलकेन विरचितः ग्रन्थनाम किम् ?

**Hint:**गीतारहस्यम्